# हल प्रश्न-पत्र-2023
## संस्कृतम्
### कक्षा-X

**अवधि :** होरात्रयम् **पूर्णाङ्का: 80**

**सामान्य निर्देश—**

अस्मिन् प्रश्नपत्रे **चत्वार:** खण्डा: सन्ति—

| | | | |
|---|---|---|---|
| **खण्ड: 'क'** | — | अपठित-अवबोधनम् | — 10 अङ्का: |
| **खण्ड: 'ख'** | — | रचनात्मक-कार्यम् | — 15 अङ्का: |
| **खण्ड: 'ग'** | — | अनुप्रयुक्त-व्याकरणम् | — 25 अङ्का: |
| **खण्ड: 'घ'** | — | पठित-अवबोधनम् | — 30 अङ्का: |

अस्मिन् प्रश्नपत्रे **18** प्रश्ना: सन्ति।

**Delhi & Outside Delhi Set** **Code No. 52**

## खण्ड–'क'

**(अपठित-अवबोधनम्) (10 अङ्का:)**

**1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत। 10**

अस्माकम् देश: प्राचीनकालादेव प्राकृतिक-पर्यावरणस्य पोषक:। वैदिककाले यद्यपि पर्यावरणस्य प्रदूषणस्य समस्या नासीत् तथापि वेदेषु स्थाने-स्थाने ऋषीणां पर्यावरणविषयकं चिन्तनं दृश्यते। अद्य पर्यावरणं-प्रदूषणं संसारस्य भीषणतमा समस्या वर्तते, परं जना: अस्या: गाम्भीर्यं न अनुभवन्ति। पर्यावरणं रक्षणीयं वृक्षा: रोपणीया: रक्षणीया: च इति शृण्वन्त: उद्घोषयन्त: अपि वयं प्रतिदिनं तेषां कर्तनं पश्याम:। 'प्लास्टिक' इति रसायनेन निर्मितवस्तूनि पर्यावरणाय हानिकराणि इति जानन्त: अपि जना: एतेषां प्रयोगं बाहुल्येन कुर्वन्ति। पर्यावरणप्रदूषकं धूमं क्षिपतां वाहनानाम् औद्योगिक-यन्त्रागाराणां सङ्ख्या निरन्तरं वर्धमाना अस्ति। यद्यपि विकासाय नवीना: आविष्कारा:, अपेक्षिता: परं सञ्चाराय विस्तृता: सुरक्षिता: मार्गा: जनानां कृते अपि आवश्यका: एव। यदि पर्यावरणं प्राणिजीवनाय अनुकूलं न भविष्यति तर्हि पृथिव्यां जीवनमेव असम्भवं भविष्यति तदा भौतिकनिकासेन किम्। अत: सर्वकार: जनसहयोगेन सर्वथा पर्यावरणरक्षणाय यत्नशील: भवेदिति।

**(अ) एकपदेन उत्तरत—(केवलं प्रश्नद्वयम्) 2×1=2**

(i) के रोपणीया: रक्षणीया: च?

(ii) कदा पर्यावरणस्य प्रदूषणस्य समस्या नासीत्?

(iii) अस्माकं देश: कस्य पोषक:?

**(ब) पूर्णवाक्येन लिखत—(केवलं प्रश्नद्वयम्) 2×2=4**

(i) किं जानन्त: जना: प्लास्टिक-निर्मितवस्तूनां प्रयोगं बाहुल्येन कुर्वन्ति?

(ii) यदि पर्यावरणं प्राणिजीवनाय अनुकूलं न भविष्यति तर्हि किं भविष्यति?

(iii) केषां सङ्ख्या निरन्तरं वर्धमाना अस्ति?

**(स)** अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत। **1**

**(द) यथानिर्देशम् उत्तरत—(केवलं प्रश्नत्रयम्) 3×1=3**

(i) **'जना: अस्या: गाम्भीर्यं न अनुभवन्ति' अत्र किं क्रियापदम्?**

(a) जना: (b) अत्र
(c) अस्या: (d) अनुभवन्ति

(ii) **'नवीना:' इति विशेषणपदस्य विशेष्यपदं किम्?**

(a) जना: (b) आविष्कारा:
(c) अपेक्षिता: (d) मार्गा:

(iii) **'शोषक:' इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम्?**

(a) विषय: (b) चिन्तनीय:
(c) सरल: (d) पोषक:

(iv) **'वयं प्रतिदिनं तेषां कर्तनं पश्याम:।' अस्मिन् वाक्ये 'पश्याम:' क्रियाया: कर्तृपदं किं प्रयुक्तम्?**

(a) वयम् (b) तेषाम्
(c) प्रतिदिनम् (d) कर्तनम्

**उत्तर—(अ) एकपदेन उत्तरम्—**

**(i)** वृक्षाः।

**(ii)** वैदिककाले।

**(iii)** प्राकृतिक पर्यावरणस्य।

**(ब) पूर्णवाक्येन उत्तरम्—**

**(i)** 'प्लास्टिक' इति रसायेन निर्मितवस्तूनि पर्यावरणाय हानिकराणि इति जानन्तः अपि जनाः प्लास्टिक-निर्मि. तवस्तूनां प्रयोगं बाहुल्येन कुर्वन्ति।

**(ii)** यदि पर्यावरणं प्राणिजीवनाय अनुकूलं न भविष्यति तर्हि पृथिव्यां जीवनमेव असम्भवं भविष्यति।

**(iii)** पर्यावरण प्रदूषकं वाहनानाम् औद्योगिक-यन्त्रागाराणां संख्या निरन्तरं वर्धमाना अस्ति।

**(स)** अस्य उपयुक्त शीर्षकः 'पर्यावरणरक्षणम्' इति।

**(द) यथा निर्देशम् उत्तरम्—** 3×1=3

**(i)** (d) अनुभवन्ति

**(ii)** (b) आविष्काराः

**(iii)**(d) पोषकः

**(iv)**(a) वयम्

## खण्ड–'ख'

**रचनात्मककार्यम् (रचनात्मक कार्य) — (15 अङ्काः)**

**2. भवती प्रभा अस्ति। स्वमातरं प्रति स्वस्वास्थ्यविषये लिखितम् इदं पत्रं मञ्जूषायाः सहायतया पनुः सम्पूर्ण लिखतु—** 10×½=5

विद्यालयपरिसरः

(i) ......................

समादरणीयाः (ii) ...............

सादरं प्रणामाः।

अत्र कुशलं तत्रास्तु। सम्प्रति मम (iii) .............. परीक्षा सञ्चरति। अत्र छात्रावासे पठनस्य वातावरणं तु शोभनं वर्तते। अत्र अध्यापकाः अपि च अतीव कर्मठाः सन्ति। अतः पठस्य कार्यं (iv) .............. एव भवति, परन्तु अध्ययनकारणात् शयनस्य भोजनस्य च (v) .............. एव न प्राप्यते। अतः अद्यत्वे मम (vi) ............... सुष्ठु नास्ति। अहं (vii) ................ पीडिता अस्मि। परं काचिद् अपि (viii) .............. नैव करणीया। आशासे अहं शीघ्रमेव पूर्णतया स्वस्था भविष्यामि। परीक्षायाः अनन्तरं (ix) ............. आगमिष्यामि। तदा वयं मिलित्वा भ्रमणाय वाराणसीनगरं गमिष्यामः। पित्रे (x) ..............।

भवत्याः पुत्री

प्रभा

**मञ्जूषा**

| |
|---|
| वार्षिकी, शिमलातः, ज्वरेण, मातृचरणाः, गृहम्, स्वास्थ्यम्, समुचितम्, नमः, समयः, चिन्ता। |

**उत्तर— पत्रम्—**

| | |
|---|---|
| (i) शिमलातः | (vi) स्वास्थ्यम् |
| (ii) मातृचरणाः | (vii) ज्वरेण |
| (iii) वार्षिकी | (viii) चिन्ता |
| (iv) समुचितम् | (ix) गृहम् |
| (v) समयः | (x) नमः |

**3. प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत—** 5×1=5



**मञ्जूषा**

| |
|---|
| उद्यानम्, धावतः, जनौ, वातावरणम्, नगरस्य, महिला, वृक्षाः, साधारणम्, विशालभवनानि, बसस्थानम्, स्वच्छम्, प्रतीक्षाम्, तिष्ठन्ति, अवकरपात्रम्। |

**अथवा**

मंजूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य न्यूनातिन्यूनं **पञ्चभिः** संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत। **5×1=5**

**'वृक्षाः अस्माकं मित्राणि'**

**मञ्जूषा**

| |
|---|
| वृक्षाः, सत्पुरुषाः, परोपकारम्, छाया, फलानि, पुष्पाणि, जनाः, पवनः, काष्ठम्, शीतलः, स्वास्थ्याय, आवश्यकम्, पथिकः, आनन्दम्, अनुभवन्ति, भूमेः संरक्षणम्, वर्षा, पक्षिभ्यः वासः। |

**उत्तर— चित्रवर्णनम्—**

**(i)** उद्याने द्वौ बालकौ स्तः।

**(ii)** नगरस्य बसस्थानं स्वच्छम् अस्ति।

**(iii)** उद्याने वृक्षाः सन्ति।

**(iv)** उद्यानस्य पार्श्वे अवकरपात्रम् अस्ति।

**(v)** उद्यानस्य वातावरणं स्वच्छम् अस्ति।

**अथवा**

**अनुच्छेद लेखनम्—** **5×1=5**

**(i)** वृक्षा: परोपकारं कुर्वन्ति।

**(ii)** ते छाया, फलानि, पुष्पाणि, काष्ठानि, मूलानि, त्वकञ्च यच्छन्ति।

**(iii)** शीतल: पवन: स्वास्थ्याय आवश्यकम् अस्ति।

**(iv)** वृक्षोपरि पक्षिणां वास: भवति।

**(v)** वृक्षा: वर्षाकाले भूमिसंरक्षणं कुर्वन्ति।

**4. अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत। (केवलं वाक्यपञ्चकम्) —** **5×1=5**

**(i)** कल तुम कहाँ गए थे?

**Where did you go yesterday?**

**(ii)** घर के बाहर मत खेलो।

**Do not play outside the home.**

**(iii)** भारत ऋषियों की भूमि है।

**Bharat is the land of saints.**

**(iv)** हमारा जीवन अनुशासित होना चाहिए।

**Our life should be disciplined.**

**(v)** मैं अपने जन्मदिन पर देवालय जाऊँगा।

**I will go to the temple on my birthday.**

**(vi)** हम बाग में खेलते हैं।

**We play in the garden.**

**(vii)** बालक मित्रों के साथ पढ़ता है।

**The child studies with friends.**

**उत्तर— अनुवादकार्यम्—**

**(i)** हय त्वं कुत्र अगच्छ:?

**(ii)** गृहात् बहि: मा क्रीड।

**(iii)** 'भारत:' ऋषीणां भूमिरस्ति।

**(iv)** अस्माकं जीवनम् अनुशासितं भवितव्यम्।

**(v)** अहं स्वजन्मदिवसे देवालयं गमिष्यामि।

**(vi)** वयम् उद्याने क्रीडाम:।

**(vii)** बालक: मित्रै: सह पठति।

## खण्ड–'ग'

**'अनुप्रयुक्त व्याकरणम्' (अनुप्रयक्त व्याकरण)**

**(25 अङ्का:)**

**5. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत। (केवलं प्रश्नचतुष्टयम्) —** **4×1=4**

**(i)** क्रुद्ध: सिंह: <u>इतस्तत:</u> धावति।

**(ii)** <u>प्रकृति: + एव</u> शरणम्।

**(iii)** <u>उदीरित: + अर्थ:</u> पशुनापि गृह्यते।

**(iv)** <u>अचिरादेव</u> चण्डवातेन सह प्रवर्ष: समजायत।

**(v)** माम् नय <u>अस्मात् + नगरात्</u> बहुदूरम्।

**उत्तर— सन्धिकार्यम्—**

**(i)** इत: + तत: (स् = :)

**(ii)** प्रकृतिरेव (: = र्)

**(iii)** उदीरितोऽर्थ: (: = ओ)(अ = ऽ)

**(iv)** अचिरात् + एव (त् = द्)

**(v)** अस्मान्नगरात् (त् = न्)

**6. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्य: चित्वा लिखत। (केवलं प्रश्नचतुष्टयम्)** **4×1=4**

**(i) स: <u>भारवेदनया</u> क्रन्दति स्म।**

**(a)** भारम् वेदनया **(b)** भारस्य वेदनया

**(c)** भारेण वेदनया **(d)** भाराय वेदनया

**(ii) प्रस्तरतले <u>लतातरुगुल्मा</u> में भवन्तु पिष्टा:।**

**(a)** लता च तरु: च **(b)** लता च तरव: च

**(c)** लता: च गुल्मा: च **(d)** लता: च तरव: च गुल्मा: च

**(iii) <u>रामस्य समीपम्</u> उपसृत्य प्रणम्य च।**

**(a)** उपरामम् **(b)** उपरामेण

**(c)** उपराम: **(d)** उपरामस्य

**(iv) को भेद: <u>पिक: च काक: च तयो:</u>।**

**(a)** पिककाकम् **(b)** पिककाकयो:

**(c)** पिककाकस्य **(d)** पिककाका:

**(v) <u>विमूढधी:</u> मधुरं न वदति।**

**(a)** विमूढा धी: **(b)** विमूढ: धी:

**(c)** विमूढा: धिय: **(d)** विमूढा धी: यस्य स:

**उत्तर— समासकार्यम्—**

**(i)** (c) भारेण वेदनया

**(ii)** (d) लता: च तरव: च गुल्मा: च

**(iii)** (a) उपरामम्

**(iv)** (b) पिककाकयो:

**(v)** (d) विमूढा धी: यस्य स:

**7. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्य: चित्वा लिखत:**

**(केवलं प्रश्नचतुष्टयम्) 4×1=4**

**(i)** **<u>भगवान्</u> वाल्मीकि: वधू: इति।**

(a) भग + वन् (b) भग + मतुप्

(c) भग + वतुप् (d) भग + क्तवतु

**(ii)** **सर्वेषामेव मत्कृते <u>महत् + त्व</u> विद्यते।**

(a) महत्ता (b) महत्त्वम्

(c) महत्त्व: (d) महात्वम्

**(iii)** **किं <u>नामधेया</u> युवयोर्जननी।**

(a) नामधेय + तल् (b) नामधेय + त्व

(c) नामधेय + कत्वा (d) नामधेय + टाप्

**(iv)** **देशस्य सेवा सर्वेषां <u>नीति + ठक्</u> कर्तव्यम् भवेत्।**

(a) नैतिकम् (b) नैतिकी

(c) नैतिक: (d) नैतिक

**(v)** **नृत्यातिरिक्तं का तव <u>विशेषता</u>?**

(a) विशेष + टाप् (b) विशेष + क्त

(c) विशेष + तल् (d) विशेष + क्तवतु

**उत्तर— प्रकृति-प्रत्यय:—**

**(i)** (c) भग + वतुप्

**(ii)** (c) महत्त्व:

**(iii)** (b) नामधेय + टाप्

**(iv)** (a) नैतिकम्

**(v)** (c) विशेष + तल्

**8. वाच्यानुसारं उचितपदै: रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुन: लिखत: (केवलं प्रश्नत्रयम्) 3×1=3**

**(i)** **मोहन: — रमे! किं तत्र शालायाम् गायक: गीतानि गायति।**

**रमा — आम्, तत्र गायकेन गीतानि ............।**

(a) गायति (b) गायन्ति

(c) गीयन्ते (d) गीयते

**(ii)** **मोहन: — किं कापि बाला तत्र नृत्यति?**

**रमा — आम्, तत्र तु द्वे बाले ...........।**

(a) नृत्यति (b) नृत्यत:

(c) नर्तिष्यत: (d) नृत्यन्ति

**(iii)** **मोहन: — किम् इदानीं त्वम् अपि तत्र गच्छसि?**

**रमा — आम्, ............. अपि तत्र गम्यते।**

(a) अहम् (b) वयम्

(c) मया (d) त्वया

**(iv)** **मोहन: — अरे! गुरु: आयाति।**

**अहं तु ........... प्रणमामि।**

(a) गुरुम् (b) गुरु:

(c) गुरवे (d) गुरो:

**उत्तर— संवाद लेखनम्—(रिक्त स्थान पूर्ति)**

**(i)** मोहन: — रमे! किं तत्र शालायां गायक: गीतानि गायति।

रमा — आम्, तत्र गायकेन गीतानि <u>गीयन्ते</u>।

**(ii)** मोहन: — किं कापि बाला तत्र नृत्यति?

रमा — आम्, तत्र तु द्वे बाले <u>नृत्यत:</u>।

**(iii)** मोहन: — किम् इदानीं त्वमपि तत्र गच्छसि?

रमा — आम्, <u>मया</u> अपि तत्र गम्यते।

**(iv)** मोहन: — अरे! गुरु: आयानि। अहं तु <u>गुरुं</u> प्रणमामि।

**9. कालबोधकशब्दै: अधोलिखित-दिनचर्यां पूरयत: (केवलं प्रश्नचतुष्टयम्) 4×1=4**

**(i)** अहं नित्यं रात्रौ (8:30) भोजनं करोमि।

**(ii)** तदन्तरं (8:45) भ्रमणाय गच्छामि।

**(iii)** तदा (9:30) मनोरञ्जनाय दूरदर्शनं पश्यामि।

**(iv)** दूरदर्शनं दृष्ट्वा (10:00) पठनं करोमि।

**(v)** रात्रौ (11:15) अहं स्वपिमि।

**उत्तर— समयलेखनम्—**

**(i)** अहं नित्यं रात्रौ <u>सार्ध अष्टवादने</u> भोजनं करोमि।

**(ii)** तदन्तरं <u>पादोन नववादने</u> भ्रमणाय गच्छामिं।

**(iii)** तदा <u>सार्ध नववादने</u> मनोरञ्जनाय दूरदर्शनं पश्यामि।

**(iv)** दूरदर्शनं दृष्ट्वा <u>दशवादने</u> पठनं करोमि।

**(v)** रात्रौ <u>सपाद एकादशवादने</u> अहं स्वपिमि।

**10. मञ्जूषायां प्रदत्तै: उचितै: अव्ययपदै: अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत: (केवलं त्रयम्) 3×1=3**

**(i)** ते सभायां ........... मा वदेयु:।

**(ii)** यदि त्वं मां मुक्त्वा यासि ............. वेलाप्यवेला स्यात्।

**(iii)** यूयम् .............. प्रयासं कुरुत।

**(iv)** मार्गेषु ............. अवकरं न क्षिपेयुः।

**मञ्जूषा**

| तदा, इतस्ततः, वृथा, अपि। |
|---|

**उत्तर—अव्यय लेखनम्—**

**(i)** ते सभायां <u>वृथा</u> मा वदेयुः।

**(ii)** यदि त्वं मां मुक्त्वा यासि <u>तदा</u> वेलाप्यवेला स्यात्।

**(iii)** यूयम् <u>अपि</u> प्रयाशं कुरुत।

**(iv)** मार्गेषु <u>इतस्ततः</u> अवकरं न क्षिपेयुः।

**11. अधोलिखितवाक्येषु रेखाङ्कित—अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत। (केवलं प्रश्नत्रयम्) 3×1=3**

**(i)** **<u>पवनं</u> वेगेन वहति।**

**(a)** पवन **(b)** पावनम्

**(c)** पवनः **(d)** पवनेन

**(ii)** **अहं आम्रं <u>खादति</u>।**

**(a)** खादामि **(b)** खादतः

**(c)** खादसि **(d)** खादामः

**(iii)** **<u>मोहनः</u> गृहं तत्रास्ति।**

**(a)** मोहनम् **(b)** मोहनात्

**(c)** मोहने **(d)** मोहनस्य

**(iv)** **भवान् श्वः कुत्र <u>गच्छति</u>?**

**(a)** गमिष्यति **(b)** अगच्छत्

**(c)** गच्छतु **(d)** आगमिष्यति

**उत्तर—शुद्ध पद लेखनम्—**

**(i)** <u>पवनः</u> वेगेन वहति।

**(ii)** अहम् आम्रं <u>खादामि</u>।

**(iii)** <u>मोहनस्य</u> गृहं तत्रास्ति।

**(iv)** भवान् श्व कुत्र <u>गमिष्यति</u>?

## खण्ड–'घ'

**पठित—अवबोधनम् (पठित अवबोधन)— (30 अङ्काः)**

**12. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत। 5**

कश्चन निर्धनो जनः भूरि परिश्रम्य कश्चिद् वित्तमुपार्जितवान्। तेन वित्तेन स्वपुत्रम् एकस्मिन् महाविद्यालये प्रवेशं दापयितुं सफलो जातः। तत्तनयः तत्रैव छात्रावासे निवसन् अध्ययने संलग्नः समभूत्। एकदा स पिता तनूजस्य रुग्णतामाकर्ण्य व्याकुलो जातः पुत्रं द्रष्टुं च प्रस्थितः। परमर्थकार्श्येन पीडितः स बसयानं विहाय पदातिरेव प्राचलत्। पदातिक्रमेण संचलन् सायं सतयेऽप्यसौ गन्तव्याद् दूरे आसीत्। निशान्धकारे प्रसृते विजने प्रदेशे पदयात्रा न शुभावहा 'इति विचार्य स पार्श्वस्थिते ग्रामे रात्रिनिवासं कर्तुं कञ्चिद् गृहस्थमुपागतः।'

करुणापरो गृही तस्मै आश्रयं प्रायच्छत्।

**(i) एकपदेन उत्तरत—(केवलं प्रश्नद्वयम्) 2×½=1**

**(क)** कीदृशः जनः भूरि परिश्रम्य किञ्चिद् वित्तमुपार्जितवान्?

**(ख)** तनयः कुत्र निवसन् अध्ययने संलग्नः समभूत्?

**(ग)** करुणापरो गृही कस्मै आश्रयं प्रायच्छत्?

**(ii) पूर्णवाक्येन उत्तरत—(केवलं प्रश्नद्वयम्) 2×1=2**

**(क)** स पिता किमर्थं व्याकुलो जातः?

**(ख)** सः किं विचार्य पार्श्वस्थिते ग्रामे रात्रिनिवासं कर्तुं कश्चिद् गृहस्थमुपागतः?

**(ग)** अर्जितेन वित्तेन सः जनः किम् अकरोत्?

**(iii) निर्देशानुसारम् उत्तरत—(केवलं प्रश्नद्वयम्) 2×1=2**

**(क)** "परमर्थकार्श्येन पीडितः सः बसयानं विहाय पदातिरेव प्राचलत्" अत्र वाक्ये कर्तृपदं किम्?

**(ख)** 'करुणापरः' इति विशेषणपदस्य विशेष्यपदं किम्?

**(ग)** 'पुत्रस्य' इति पदस्य किं पर्यायपदं गद्यांशे प्रयुक्तम्?

**उत्तर—गद्यांश—**

**(i)** **एकपदेन उत्तरम्—**

**(क)** निर्धनोजनः।

**(ख)** छात्रावासे।

**(ग)** निर्धनजनाय। (तस्मै)

**(ii)** **पूर्णवाक्येन उत्तरम्—**

**(क)** स पिता तनजस्य रूग्णतामा कर्ण्य व्याकुलो जातः।

**(ख)** निशान्धकारे प्रसृते विजने प्रदेशे पदयात्रा न शुभावहा इति विचार्य स पार्श्व स्थिते ग्रामे रात्रि निवासं कश्चिद् गृहस्थमुपागतः।

**(ग)** अर्जितेन वित्तेन सः स्वपुत्रम् एकस्मिन् महाविद्यालये प्रवेश कार्याय व्ययमकरोत्।

**(iii) निर्देशानुसार उत्तरम्—**

**(क)** सः कर्तृपदम्।

**(क)** 'गृही' विशेष्यपदम्।

**(ग)** 'तनयः' इति पर्यायपदम्।

**13. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।** **5**

वायुमण्डलं भृशं दूषितं न हि निर्मलं जलम्।
कुत्सितवस्तुमिश्रितं भक्ष्यं समलं धरातलम्॥
करणीयं बहिरन्तर्जगति तु बहु शुद्धीकरणम्। शुचि ...॥

**(i) एकपदेन उत्तरत—(केवलं प्रश्नद्वयम्)** **2×½=1**

**(क)** जलं कीदृशं न अस्ति?

**(ख)** समलं किम् अभवत्?

**(ग)** भृशं दूषितं किम् अस्ति?

**(ii) पूर्णवाक्येन उत्तरत—(केवलं प्रश्नद्वयम्)** **2×1=2**

**(क)** मनुष्यैः कि करणीयम्?

**(ख)** भक्ष्यं कीदृशं जातम्?

**(ग)** शुद्धीकरणं कुत्र करणीयम्?

**(iii) भाषिककार्यम्—(केवलं प्रश्नद्वयम्)** **2×1=2**

**(क)** 'बहु' इति पदस्य पर्यायपदं किमस्ति?

**(ख)** 'अन्तर्' इति पदस्य विपर्ययपदं किम्?

**(ग)** 'जलम्' इति पदस्य विशेषणपदं किम्?

**उत्तर—पद्यांश—**

**(i) एकपदेन उत्तरम्—**

**(क)** निर्मलम्

**(ख)** धरातलम्

**(ग)** वायुमण्डलम्

**(ii) पूर्णवाक्येन उत्तरम्—**

**(क)** मनुष्यैः बहिः अन्तश्च जगति शुद्धीकरणं करणीयम्।

**(ख)** कुत्सितवस्तुमिश्रितं भक्ष्यं जातम्।

**(ग)** शुद्धीकरणं जगति करणीयम्।

**(iii) भाषिककार्यम्—**

**(क)** भृशम्

**(ख)** बहिः

**(ग)** निर्मलम

**14. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।** **5**

(एतस्मिन्नेव काले व्याघ्रचित्रकौ अपि नदीजलं पातुमागतौ एतं विवादं श्रुणुतः वदतः च)

*व्याघ्रचित्रकौ* — अरे किं वनराजपदाय सुपात्रं चीयते? एतदर्थं तु आवामेव योग्यौ! यस्य कस्यापि चयनं कुर्वन्तु सर्वसम्मतया।

*सिंहः* — तूष्णीं भव भोः। युवामपि मत्सदृशौ भक्षकौ न तु रक्षकौ। एते वन्यजीवः भक्षकं रक्षकपदयोग्यं न मन्यन्ते अतएव विचारविमर्शः प्रचलति।

*बकः* — सर्वथा सम्यगुक्तम् सिंहमहोदयेन। वस्तुतः एव सिंहेन बहुकालपर्यन्तं शासनं कृतम् परमधुना तु कोऽपि पक्षी एव राजेति निश्चेतव्यम् अत्र तु संशीतिलेशस्यस्यापि अवकाशः एव नास्ति।

*सर्वे पक्षिणः* — आम् आम्-कश्चित् खगः एव वनराजः भविष्यति इति।

**(i) एकपदेन उत्तरत—(केवलं प्रश्नद्वयम्)** **2×½=1**

**(क)** कौ नदीजलं पातुमागतौ?

**(ख)** 'तूष्णीं भव' इति कः कथयति?

**(ग)** किमर्थं सुपात्रं चीयते?

**(ii) पूर्णवाक्येन उत्तरत—(केवलं प्रश्नद्वयम्)** **2×1=2**

**(क)** तत्र किमर्थं विचारविमर्शः प्रचलति?

**(ख)** अधुना किं निश्चेतव्यम्?

**(ग)** सर्वे पक्षिणः किं कथयन्ति?

**(iii) भाषिककार्यम्—(केवलं प्रश्नद्वयम्)** **2×1=2**

**(क)** 'एतस्मिन्नेव काले व्याघ्रचित्रकौ अपि नदीजलं पातुम् आगतौ' वाक्ये किं कर्तृपदम् प्रयुक्तम्?

**(ख)** 'पक्षिणः' इति विशेष्यपदस्य किम्?

**(ग)** 'कलहम्' इति पदस्य किं पर्यायपदं गद्यांशे प्रयुक्तम्?

**उत्तर—नाट्यांश—**

**(i) एकपदेन उत्तरम्—**

**(क)** व्याघ्रचित्रकौ।

**(ख)** सिंहः।

**(ग)** वनराजपदाय।

**(ii) पूर्णवाक्येन उत्तरम्—**

**(क)** वन्यजीवा: भक्षकं रक्षक पद योग्यं न मन्यते अतएव विचार विमर्श: प्रचलति।

**(ख)** कोऽपि पक्षी एव वनराजपदाय भवतु इति निश्चेतव्यम्।

**(ग)** सर्वेपक्षिण: कथयन्ति यत् कश्चित् खग: एव वन. राज: भविष्यति, इति।

**(iii) भाषिककार्यम्—**

**(क)** व्याघ्रचित्रकौ कर्तृपदम्।

**(ख)** 'सर्वे' विशेषणपदम्।

**(ग)** 'संशीतिलेश:' पर्यायपदम्।

**15. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत। (केवलं प्रश्नचतुष्टयम्)** **4×1=4**

**(i)** आत्मकल्याणम् इच्छन् नर: कदापि <u>परेषाम्</u> अहितं कर्म न कुर्यात्।

**(ii)** अयम् <u>अन्येभ्यो</u> दुर्बल:।

**(iii)** पुरा त्वया <u>मह्यं</u> व्याघ्रत्रयं दत्तम्।

**(iv)** <u>चातक:</u> वने वसति।

**(v)** तपोवनवासिन: जननीं <u>देवीनाम्ना</u> आह्वयन्ति।

**उत्तर—प्रश्ननिर्माणम्—**

**(i)** आत्मकल्याणम् इच्छन् नर: कदापि <u>केषांम्</u> अहितं कर्मं न कुर्यात्?

**(ii)** अयं <u>केभ्यो</u> दुर्बल:?

**(iii)** पुरा त्वया <u>कस्मै</u> व्याघ्रत्रयं दत्तम्?

**(iv)** <u>क:</u> वने वसति?

**(v)** तपोवनवासिन: जननीं <u>कथा</u> आह्वयन्ति?

**16. मञ्जूषाया: सहायतया अधोलिखितश्लोकस्य अन्वयं पूरयत।** **4×1=4**

मृगा मृगै: सङ्गमनुव्रजन्ति,
गावश्च गोभि: तुरगास्तुरङ्गै:।
मूर्खाश्च मूर्खै: सुधिय: सुधीभि:,
समान-शील-व्यसनेषु सख्यम्।।

**अन्वय:—**

मृगा: (i) .............. गावश्च गोभि: (ii) ................ तुरङ्गै:, मूर्खा: मूर्खै:, सुधिय: सुधीभि: सङ्गम् (iii) .............। (iv) .......... समान-शील व्यसनेषु (भवति)।

**मञ्जूषा**

| सख्यम्, मृगै:, तुरगा:, अनुव्रजन्ति। |
|---|

**अथवा**

**अधोलिखितश्लोकस्य भावार्थं मञ्जूषात: उचितपदानि चित्वा पूरयत।** **4×1=4**

आचार: प्रथमो धर्म: इत्येतद् विदुषां वच:।
तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषत:॥

**भावार्थ:**

अस्य भावोऽस्ति यत् सदाचार: जनानां (i) .............. धर्म: अस्ति, इति (ii) ................ कथयन्ति अतएव जनै: (iii) ............. रक्षा प्राणेभ्य: अपि (iv) .............. करणीया।

**मञ्जूषा**

| विद्वांस:, विशेषतया, प्रथम:, सदाचारस्य। |
|---|

**उत्तर—अन्वय:—**

मृगा: <u>मृगै:</u> गावश्च गोभि: <u>तुरगा:</u> तुरङ्गै:, मूर्खा: मूर्खै:, सुधिाया सुधीभि: सङ्गम् <u>अनुव्रजन्ति</u>। <u>सख्यं</u> समान शील व्यसनेषु (भवति)।

**अथवा**

**भावार्थ:**

अस्य भावोऽस्ति यत् सदाचार: जनानां <u>प्रथम:</u> धर्म: अस्ति, इति <u>विद्वांस:</u> कथयन्ति अतएव जनै: <u>सदाचारस्य</u> रक्षा प्राणेभ्य: अपि <u>विशेषतया</u> करणीया।

**17. अधोलिखितानि वाक्यानि घटनाक्रमानुसारं संयोज्य पुन: लिखत।** **8×½=4**

**(i)** व्याघ्र: तां व्याघ्रमारीं मत्वा अधावत्।

**(ii)** तस्य भार्या बुद्धिमती आसीत्।

**(iii)** मार्गे सा एकं व्याघ्रं ददर्श।

**(iv)** बुद्धिमती व्याघ्रजाद् भयात् मुक्ताऽभवत्।

**(v)** तत्र राजसिंह: नाम राजपुत्र: वसति स्म।

**(vi)** अस्ति देउलाख्यो नाम ग्राम:।

**(vii)** सा पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता।

**(viii)** सा वाक्चातुर्येण बुद्धे: च प्रयोगेन व्याघ्रं भयभीतं कृतवती।

**उत्तर—घटनाक्रमानुसार लेखनम्—**

**(i)** अस्ति देउलाख्यो नाम ग्राम:।

**(ii)** तत्र राजसिंह: नाम राजपुत्र: वसति स्म।

**(iii)** तस्य भार्या बुद्धिमती आसीत्।

**(iv)** सा पुत्र द्वयोपेता पितुर्गृहं प्रति चलिता।

**(v)** मार्गे सा एकं व्याघ्रं ददर्श।

**(vi)** व्याघ्रः तां व्याघ्रमारीं मत्वा अधावत्।

**(vii)** सा वाक्चातुर्येण बुद्धेः च प्रयोगेन व्याघ्रं भयभीतं कृतवती।

**(viii)** बुद्धिमती व्याघ्रजाद् भयात् मुक्ताऽभवत्।

**18. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत। (केवलं प्रश्नत्रयम्)** 3×1=3

**(i) एकः दुर्बलः बलीवर्दः भूमौ पपात।**

(a) गौः (b) धेनुः

(c) वृषभः (d) महिषः

**(ii) तदा तत्र सुराधिपः आगच्छत्।**

(a) नृपः (b) कृषकः

(c) धेनुः (d) इन्द्रः

**(iii) नराणां प्रथमः शत्रुः आलस्यम् अस्ति।**

(a) मानवः (b) मित्रम्

(c) रिपुः (d) सहायकः

**(iv) फलच्छायासमन्वितः वृक्षः सेवितव्यः।**

(a) तरुः (b) खगः

(c) छाया (d) मानवः

**उत्तर—उचित लेखनम्—**

**(i)** (c) वृषभः

**(ii)** (d) इन्द्रः

**(iii)** (c) रिपुः

**(iv)** (a) तरुः

❑❑❑